# आदर्शसंस्कृतप्रश्नपत्रम् सं. I

# संस्कृतम् (ऐच्छिकम्)

# कोड संख्या 022

# द्वादश कक्षा

| | |
|---|---|
| अवधिः होरात्रयम् | पूर्णाङ्काः 100 |
| समय : तीन घण्टे | पूर्णाङ्क : 100 |
| Time : 3 Hours | Maximum Marks : 100 |

अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
इस प्रश्नपत्र में चार खण्ड हैं।
**This question paper has four sections.**

| | | |
|---|---|---|
| खण्डः (क) | अपठितांश–अवबोधनम् | 15 |
| **Section (A)** | **Reading Comprehension** | |
| खण्डः (ख) | संस्कृतेन रचनात्मककार्यम् | 20 |
| **Section (B)** | **Writing Skill in Sanskrit** | |
| खण्डः (ग) | पठित–अवबोधनम् | 45 |
| **Section (C)** | **Textual Comprehension** | |
| खण्डः (घ) | छन्दोऽलङ्काराः | 20 |
| **Section (D)** | **Meters and Figures of Speech** | |

निर्देशाः
निर्देश
**Instructions**

1. उत्तराणि उत्तरपुस्तिकायाम् एव लेखनीयानि।
   उत्तर उत्तरपुस्तिका में ही लिखें।
   **Write answers in the answer-sheet only.**
2. संकेताभावे सर्वेषां प्रश्नानामुत्तराणि संस्कृतेनैव लेखनीयानि।
   जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें।
   **Answer all questions in Sanskrit unless instructions are given otherwise.**

## खण्डः 'क' Section A

## अपठित–अवबोधनम् **15**

## Reading Comprehension

**1.** **अधोलिखितम् अनुच्छेदद्वयं पठित्वा प्रश्नान् संस्कृतेन उत्तरत** **5**

**निम्नलिखित दोनों अनुच्छेदों को पढ़कर प्रश्नों के उत्तर संस्कृत में दीजिए।**

**Read the following passages and answer the questions in Sanskrit.**

**प्रथमः अनुच्छेदः**

जीवने यः समयः गतः स गतः। तस्य विषये चिन्तां मा कुरुत। किमपि एकं सेवाकार्यं स्वीकुरुत। तत् कार्यम् आजीवनं व्रतरूपेण आचरत। शनैः शनैः स्वार्थः न्यूनः भविष्यति। परार्थः अधिकाधिकः भविष्यति। अत्रैव सुखस्य रहस्यम् अस्ति। यदा सेवाकार्यं निश्चितं भवेत् तदा तस्य कृते प्रयत्नः करणीयः। श्रमः करणीयः। तेन जीवनम् आनन्दमयं भविष्यति। जीवनम् अर्थपूर्णं भविष्यति। जीवनकथा अपि प्रेरणादायिनी भविष्यति।

**प्रश्नाः**

I. **एकपदेन उत्तरत**

**एक शब्द में उत्तर दीजिए।** (1/2x2=1)

**Answer in one word only**

(i) सेवाकार्येण जीवने कः न्यूनः भविष्यति?

(ii) जीवने वयं किं स्वीकुर्याम?

II. **पूर्णवाक्येन उत्तरत**

**पूर्णवाक्य में उत्तर दीजिए।** (2)

**Answer in a complete sentence.**

जीवने कस्य विषये चिन्ता न करणीया?

III. **यथानिर्देशम् उत्तरत**

**यथानिर्देश उत्तर दीजिए।** (½ x 4 = 2)

**Answer as directed.**

(i) आनन्दमयम् इति पदं कस्य विशेषणम्?

(ii) तस्य कृते प्रयत्नः करणीयः अत्र तस्य इति पदं कस्मै प्रयुक्तम्?

(iii) स्वार्थः इति पदस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम्?

(iv) भवेत् इति क्रियापदस्य कर्ता कः?

**2) द्वितीयः अनुच्छेदः** **10**

प्रायः शतवर्षेभ्यः पूर्वं कश्चन महापुरुषः विदेशात् भारतं प्रति आगच्छत्। सः भारतस्य धूलिम् अस्पृशत्। धूलौ अलिम्पत्। आनन्दितः भूत्वा अवदत्–अहो! अद्य अहं पवित्रः सञ्जातः। स च महापुरुषः आसीत् स्वामी विवेकानन्दः। सः च पवित्रः भूभागः रामेश्वरम्। पुराणेषु रामेश्वरक्षेत्रस्य महिमा वर्णितः। अस्य मृत्तिकाकणः अपि प्रत्येकं भारतीयस्य श्रद्धाकेन्द्रम्। अत्रैव रामः वानराणां सहायतया लङ्कां प्रति सेतुं निर्मितवान्। एकदा अस्माकं राष्ट्रपतिः केरलप्रदेशे अमृतसेतुः इति पुस्तकस्य विमोचनं करोति स्म। एतत् पुस्तकं मात्रा अमृतानन्दमय्या लिखितम्। सः अवदत् एतत् पुस्तकं दृष्ट्वा अहम् रामसेतुं स्मरामि। तद् एकम् ऐतिहासिकं चिह्नम्। उपग्रहचित्रैः तस्य अस्तित्वं निरूपितम् अस्ति इति। अहो विचित्रम् अस्माकं भारतम्।

**प्रश्नाः**

I. **एकपदेन उत्तरत** (1x2 = 2)

**एक शब्द में उत्तर दीजिए।**

**Answer in one word only**

(i) पुराणेषु कस्य महिमा वर्णितः?

(ii) अमृतसेतुः इति पुस्तकस्य विमोचनम् अस्माकं राष्ट्रपतिः कुत्र करोति स्म?

II. **पूर्णवाक्येन उत्तरत**

**पूर्णवाक्य में उत्तर दीजिए।**

**Answer in a complete sentence**

विवेकानन्दः भारतस्य मृत्तिकायां विलुण्ठनं कृत्वा किम् अवदत्?

III. **यथानिर्देशम् उत्तरत** (1x4= 4)

**यथा निर्देश उत्तर दीजिए।**

**Answer as directed**

(i) ऐतिहासिकम् इति पदं कस्य विशेषणम्?

(ii) उपग्रहचित्रैः तस्य अस्तित्वम् इति वाक्ये तस्य इति पदं कस्मै प्रयुक्तम्?

(iii) निर्मितवान् इति क्रियापदस्य कर्तृपदं किम्?

(iv) 'पश्चात्' इति अव्ययपदस्य किं विलोमपदम् अत्र प्रयुक्तम्? (2)

IV. **अनुच्छेदस्य कृते उपयुक्तं शीर्षकं लिखत** (2)

**अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए।**

**Write an appropriate title for this paragraph.**

# खण्डः ख (Section B)

## रचनात्मकलेखनम् **20**

## Writing Skill

**3. मञ्जूषातः उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पुनः उत्तरपुस्तिकायां लिखत**

**मञ्जूषा से उचित सङ्केत लेकर निम्नलिखित कथा को पुनः उत्तरपुस्तिका में लिखिए।**

**Rewrite the following story taking hints from the words given in the box.** (1x10=10)

एकदा साबरमती आश्रमे रात्रौ एकः चौरः (i).................... । आश्रमवासिनः तं (ii)..................... रज्ज्वा बद्ध्वा एकस्मिन् कक्षे प्राक्षिपन्। प्रातः व्यवस्थापकः चौरं कक्षात् (iii)..................आनयत्, महात्मागांधिनः समीपं च अनयत्। भीतः चौरः शिरः (iv).................तूष्णीं स्थितः आसीत्। सः चिन्तयति स्म–इदानीं किं भविष्यति? सम्भवतः (v)..................सूचयित्वा माम् समर्पयिष्यन्ति इति। तं दृष्ट्वा करुणहृदयः बापू अपृच्छत्–किं (vi)....................प्रातराशः स्वीकृतः? इति। चौरः किमपि न अवदत्। व्यवस्थापकः उवाच–बापू! एषः तु चौरः। प्रातराशस्य ---------------एव नास्ति इति। महात्मागांधिनः मुखमण्डलं कठोरं जातम्। सः (viii)..................अवदत् – किं चौरः मानवः नास्ति। नयत। प्रथमम् एषः प्रातराशं (ix)................. । इति चौरः श्रद्धया (x).............चरणयोः अपतत्। तस्य नेत्राभ्याम् अश्रूणि प्रावहन्। कालान्तरे सः महात्मनः प्रमुखः शिष्यः अभवत्।

**मञ्जूषा**

| |
|---|
| बहिः, प्रश्नः, महात्मनः, गृहीत्वा, अवनम्य, भवता, दुःखेन, प्राविशत्, रक्षाधिकारिणः, करोतु |

**3.4 प्रदत्तशब्दसहायतया दशवाक्येषु पादरक्षा–आपणस्य वर्णनं कुरुत।** (1x10=10)

**नीचे दिए गए शब्दों की सहायता से चप्पलों की दुकान का वर्णन कीजिए।**

**Describe a shoe-shop with the help of the following words.**

**शब्दाः**

पादरक्षायाः आपणम्, बह्वयः पादरक्षाः, पीतवर्णाः हरितवर्णाः कृष्णवर्णाः, आपणिकः, दर्शयति, बहवः जनाः, विविधानि मूल्यानि, धारयित्वा पश्यन्ति, मूल्यं पृच्छन्ति, दृढां, चित्रितां, अहम्, गतवान्। गतवती, क्रीतवान्/क्रीतवती, मूल्यं दत्तवान्/दत्तवती। पेटिकायां स्थापयित्वा, केचन केवलं पश्यन्ति, क्रयं न कुर्वन्ति।

# खण्डः ग (Section C)

## पठित–अवबोधनम्

**45**

## Text-book Comprehension

5. **अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत।**

**निम्नलिखित गद्यांश, पद्यांश तथा नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिए।**

**Read the following extracts from prose, poetry and drama and answer the questions.**

अ **गद्यांशः**

समुद्ररूपी ब्राह्मणः अवदत् – "तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि। एतेषां माहात्म्यम् – एकं रत्नं यद्वस्तु स्मर्यते तद् ददाति। द्वितीयरत्नेन भोजनादिकममृततुल्यमुत्पद्यते। तृतीयरत्नाच्चतुरङ्गबलं भवति। चतुर्थाद्रत्नाद्दिव्याभरणानि जायन्ते। तदेतानि रत्नानि गृहीत्वा राज्ञो हस्ते प्रयच्छेति।" ततो ब्राह्मणस्तानि रत्नानि गृहीत्वा उज्जयिनीं यावदागतः तावत् यज्ञसमाप्तिः जाता।

**प्रश्नाः**

**I एकपदेन उत्तरत** (½ x 2=1)

**एक शब्द में उत्तर दीजिए।**

**Answer in one word only**

(i) ब्राह्मणः रत्नानि गृहीत्वा कुत्र आगतः?

(ii) तृतीयरत्नात् किं भवति?

**II पूर्णवाक्येन उत्तरत**

**पूर्णवाक्य में उत्तर दीजिए।** (1 x 2=2)

**Answer in a complete sentence**

(i) कस्य व्ययार्थं समुद्रः रत्नानि अयच्छत्?

(ii) प्रथमं रत्नं किं दातुं शक्नोति?

**III यथानिर्देशं कुरुत** (½x4=2)

**यथानिर्देश कीजिए।**

**Do as directed**

(i) जायन्ते इति क्रियापदस्य कर्तृपदं किम्?

(ii) अमृततुल्यम् इति कस्य पदस्य विशेषणम्?

(iii) 'चत्वारि रत्नानि' इति स्थाने किं पदमत्र प्रयुक्तम्?

(iv) तानि इति पदस्य किं विलोमपदमत्र प्रयुक्तम्?

**आ पद्यांशः**

पापान्निवारयति योजयते हिताय,

गुह्यं निगूहति गुणान् प्रकटीकरोति।

आपद्गतं च न जहाति, ददाति काले,

सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।

**प्रश्नाः**

**I एकपदेन उत्तरत** (½ x 2=1)

**एक शब्द में उत्तर दीजिए।**

**Answer in one word only**

(i) सन्मित्रं कान् प्रकटीकरोति?

(ii) सन्मित्रं कीदृशं पुरुषं न त्यजति?

**II पूर्णवाक्येन उत्तरत**

**पूर्णवाक्य में उत्तर दीजिए।** (1x2=2)

**Answer in a complete sentence**

सन्मित्रस्य कानिचित् चत्वारि लक्षणानि लिखत

**III यथानिर्देशं कुरुत** (½ x 4=2)

**यथानिर्देश कीजिए।**

**Do as directed**

(i) रहस्यम् इति स्थाने किं पदमत्र प्रयुक्तम्?

(ii) 'प्रवदन्ति' इति क्रियापदस्य किं कर्तृपदम्?

(iii) 'प्रकटीकरोति' इत्यस्य किं विलोमपदमत्र प्रयुक्तम्?

(iv) 'इदम्' इति सार्वनामिकविशेषणस्य विशेष्यं किम्?

**इ. नाट्यांशः**

पुरुषः धिक् चपल! किमुक्तवानसि? तीक्ष्णतरा ह्यायुधश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते। राजपुत्रश्चन्द्रकेतुर्दुर्दान्तः, सोप्यपूर्वारण्यदर्शनाक्षिप्तहृदयो न यावदायाति, तावत् त्वरितमनेन तरुगहनेनापसर्पत!

बटवः कुमार! कृतं कृतमश्वेन। तर्जयन्ति विस्फारितशरासनाः कुमारमायुधश्रेणयः। दूरे चाश्रमपदम्। इतस्तदेहि। हरिणप्लुतैः पलायामहे।

लवः किं नाम विस्फुरन्ति शस्त्राणि? (इति धनुरारोपयति)।

प्रश्नाः

**I** **एकपदेन उत्तरत** (½ x 2=1)

**एक शब्द में उत्तर दीजिए।**

**Answer in one word only**

(i) धनुर्धारिणः सैनिकाः कं तर्जयन्ति?

(ii) कः धनुः आरोपयति?

**II** **पूर्णवाक्येन उत्तरत**

**पूर्णवाक्य में उत्तर दीजिए।** (1x2=2)

**Answer in a complete sentence**

चन्द्रकेतुः कस्य दर्शनेन आक्षिप्तहृदयः आसीत्?

**III** **यथानिर्देशम् उत्तरत** (½ x 4=2)

**यथानिर्देश उत्तर दीजिए।**

**Do as directed**

(i) सहन्ते इति क्रियापदस्य कर्तृपदं किम्?

(ii) दुर्दान्तः इति पदं कस्य विशेषणम्?

(iii) समीपे इति अस्य किं विलोमपदमत्र प्रयुक्तम्?

(iv) सः इति सर्वनामपदं कस्मै प्रयुक्तम्?

**6.** **शब्दार्थान् मेलयत** (½ x 4=2)

**शब्दों का अर्थों से मिलान कीजिए।**

**Match the words with their meanings.**

| | **शब्दाः** | | **अर्थाः** |
|---|---|---|---|
| अ | अभिधाय | (i) | पाण्डित्यम् |
| आ | अपगतमले | (ii) | तिरस्कुर्वन्तः |
| इ | अवधीरयन्तः | (iii) | दोषरहिते जाते |
| ई | वैदग्ध्यम् | (iv) | उक्त्वा |

**7** **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत** 1x4=4

**रेखाङ्कित पदों पर आधारित प्रश्न निर्माण कीजिए**

**Frame questions based on the underlined words.**

(i) **भगवद्वाक्यानि** समाप्तानि न भवन्ति।

(ii) परमेश्वरः **पृथिव्याः** सप्तविभागान् कृतवान्।

(iii) **सप्तपर्वतान्** सप्तकुलाचलान् वदन्ति।

(iv) कैलासश्च **मर्यादापर्वतेभ्यः** अतिरिक्तः।

**8.** **अधोलिखितयोः पद्ययोः भावार्थयोः रिक्तस्थानपूर्तिं मञ्जूषासहायतया कुरुत।**

**निम्नलिखित भावार्थों में रिक्त स्थानों की पूर्ति मञ्जूषा की सहायता से कीजिए।**

**Fill in the blanks in the explanations of the following verses with the help of words given in the box**

**I.** **ईशावास्यमिदं सर्वं, यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथाः, मा गृधः कस्यविद् धनम्।।**

**II.** **कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः।**
**एवं त्वयि नान्यथेतोऽस्ति, न कर्म लिप्यते नरः।।** (3+3=6)

**भावार्थः**

I. यत् किमपि संसारे (i)................ अस्ति तत्सर्वम् (ii)..............व्याप्तम्। (iii)...........अस्य संसारस्य भोगं कुरुत। (iv).............अपि (v).................प्रति लोलुपः मा (vi).............।

**भावार्थः**

II. मनुष्यः (i)..............कुर्वन् एव शतं (ii).............जीवितुम् इच्छेत्। एवमेव सर्वम् ईश्वरस्य अस्ति (iii)...........किमपि न अस्ति, कर्मणि (iv).............न भवेत्। एवं करणेन मनुष्ये कर्मणः (v)............न भवति। एतद् (vi)...........कोऽपि अन्यः मार्गः नास्ति।

**मञ्जूषा**

| |
|---|
| कर्म, चेतनतत्त्वम्, कस्यचिद, तव, वर्षाणि, लेपः, ईश्वरेण, लिप्तः, त्यागपूर्वकम्, धनं, अतिरिच्य, भव। |

**9.** **अधोलिखितयोः अन्वययोः रिक्तस्थानानि पूरयत।** 1-½+1-½=3

**अधोलिखित दोनों, अव्ययों में रिक्त स्थानों की पूर्ति कीजिए।**

**Fill in the blanks in the following prose-order-renderings**

एतावदुक्त्वा प्रतियातुकामं,
शिष्यं महर्षेर्नृपतिर्निषिध्य।
किं वस्तु विद्वन् गुरवे प्रदेयं,
त्वया कियद्वेति तमन्वयुङ्क्त।।

**अन्वयः**

एतावत् उक्त्वा नृपतिः प्रतियातुकामम् (i) ............... शिष्यम् निषिध्य विद्वन्! (ii) त्वया किम् वस्तु ...............प्रदेयम्, (ii) ............वा इति तम् अन्वयुङ्क्त।

II समाप्तविद्येन मया महर्षि –
र्विज्ञापितोऽभूद्गुरुदक्षिणायै।
स मे चिरायास्खलितोपचारां,
तां भक्तिमेवागणयत्पुरस्तात्।।

**अन्वयः**

समाप्तविद्येन मया (i)..................गुरुदक्षिणायै विज्ञापितः अभूत्। स मे (ii)...........अस्खलितोपचाराम् ताम् भक्तिम् एव पुरस्तात् (iii)................ ।

**10.** **अधोलिखिताः पंक्तयः कस्य कवेः कस्मात् काव्यात् सङ्कलिताः?**

**निम्नलिखित पंक्तियाँ किस कवि के किस काव्य से ली गई हैं?**

**From which work of which poet, have the following lines been extracted?** (½x10=5)

(i) असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः।

(ii) दृढसङ्कल्पोऽयं सादी न स्वकार्याद् विरमति।

(iii) अनन्तरं सर्वे अश्रुलहृदयैः सौप्रस्थानिकीं ज्ञापितवन्तः।

(iv) न धर्ममनुधावन्ति, न सत्यमनुबध्नन्ति।

(v) हा हन्त! तस्या अबोधबालिकाया अग्रे किं भावि?

**11.** **यथानिर्देशं कुरुत** (2x5=10)

**यथानिर्देश कीजिए।**

**Do as directed**

**I** **कर्तृपदं क्रियापदं च चिनुत** (½ x 4=2)

(i) अथाकस्मात् परितो मेघमाला पर्वतश्रेणीव प्रादुरभूत्।

(ii) एकः षोडशवर्षदेशीयो गौरो युवा हयेन गच्छति स्म।

**II विशेषणविशेष्यपदं चिनुत** (½ x 4=2)

(i) यत्र यत्राहं गच्छामि तत्र तत्रैवास्य शत्रुता सम्मुखस्थिता भवति।

(ii) क्रूरः 'किन्तु' मध्ये प्रविश्य सर्वं विनाशयति।

**III रेखाङ्कितसर्वनामपदं कस्मै प्रयुक्तम्?** (1 x 2=2)

(i) एवंविधयापि च <u>अनया</u> कथमपि दैववशेन परिगृहीताः विक्लवाः भवन्ति राजानः।

(ii) विशेषेण तु राज्ञाम्। उपदिश्यमानमपि <u>ते</u> न शृण्वन्ति।

**IV समानपदं चिनुत** (1 x 2=2)

(i) **<u>सारहीनाः</u>**

न केवलमेते पशुभ्यो निकृष्टास्तृणेभ्योऽपि निस्साराः एव

(ii) **त्यक्त्वा**

न तु कदाचित् कापुरुषा इव स्वस्थानम् अपहाय प्रपलायन्त।

**V कः कं कथयति** (½ x 4=2)

(i) अधुना मम गमनसमयः समुपागत एव।

(ii) भगवान् त्वां दीर्घजीवनं कारयतु।

## खण्डः 'घ' Section D
## छन्दोऽलङ्काराः
## Meters and Figures of speech

**10+10=20**

**12. I. प्रश्नान् उत्तरत**

**प्रश्नों के उत्तर दीजिए।** (1x4=4)

**Answer the questions**

(i) मः इति वर्णः गुरुः अस्ति वा लघुः?

(ii) अनुष्टुप् छन्दसि पञ्चमः वर्णः कीदृशः भवति?

(iii) 'प्रदत्ते' इति पदे कः गणः?

(iv) 'मालिनी' छन्दसि प्रतिचरणं कति वर्णाः?

**II. अधोलिखितपरिभाषाः पूरयत** (1x3=3)

**निम्नलिखित परिभाषाएँ पूर्ण कीजिए।**

**Fill in the blanks in the following definitions**

(i) जतौ तु वंशस्थ............................

(ii) ....................तभजाजगौगः।

(iii) रसैरुद्रैश्छिन्ना.......................शिखरिणी।

**III.** **अधोलिखितचरणे किं छन्दः?** (1)
**निम्नलिखित चरण में कौन सा छन्द है?**
**What is the meter in the following charana?**

सा वाणी विनयः स एव सहजः पुण्यानुभावोप्यसौ।

**IV.** **कस्यचिदेकस्य छन्दसः उदाहरणं लिखत** (2)
**किसी एक छन्द का उदाहरण लिखिए।**
**Give an example of any one of the following.**

**उपजाति, अनुष्टुप्**

**13. I.** **अलङ्काराणाम् अधोलिखिताः परिभाषाः पूरयत** (1x4=4)
**अलङ्कारों की निम्नलिखित परिभाषाएँ पूरी कीजिए।**
**Complete the following defintions of the figures of speech.**

(i) ..................उपमा................... ।

(ii) .......................उपमानोपमेययोः।

(iii) ...................... अनुप्रासः।

(iv) तद्रूपकम्............................... ।

**II.** **कस्यचिदेकस्य अलङ्कारस्य उदाहरणं लिखत** (3)
**किसी एक अलङ्कार का उदाहरण लिखिए।**
**Write an example of any one of the following figures of speech?**
**श्लेषः, उत्प्रेक्षा**

**III.** **अधोलिखितपंक्तिषु के अलङ्काराः?**
**निम्नलिखित पंक्तियों में क्या अलङ्कार हैं?**
**What are the figures of speech in the following lines?** (1x3=3)

(i) अमङ्गलमिव उपघ्नन्ति विश्वासम्।

(ii) भयानकेन स्वनेन कवलीकृतमिव गगनतलम्।

(iii) श्यामश्यामैर्गुच्छगुच्छैः कुञ्चितकुञ्चितैः कचकलापैः
शिववीरस्य विश्वासपात्रं तोरणदुर्गं प्रयाति।।

# आदर्श प्रश्नपत्र सं.–1
# ऐच्छिकपाठ्यक्रमः
# कक्षा – द्वादशी
# कोड संख्या 022
# अङ्कयोजना

अवधिः होरात्रयम् — पूर्णाङ्काः 100
समय : तीन घण्टे — पूर्णाङ्क : 100
Time : 3 Hours — Maximum Marks : 100

## खण्डः क

**I क. लघु–अनुच्छेदः** **अपठित – अवबोधनम्** **15**

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| I. | तथ्यबोध–परीक्षणम् | एकपदेन उत्तरम् | (i) स्वार्थः | ½ | |
| | | | (ii) सेवाकार्यम् | ½ | |
| II. | ,, | पूर्णवाक्येन उत्तरम् | गतसमयस्य विषये | 2 | 2 |
| III. | भाषिककार्यम् | अतिलघूत्तरप्रश्नाः | (i) जीवनस्य / जीवनम् इत्यस्य | ½ | |
| | | | (ii) सेवाकार्यस्य इति पदाय / सेवाकार्याय | ½ | |
| | | | (iii) परार्थः | ½ | 2 |
| | | | (iv) सेवाकार्यम् | ½ | |
| | | | | | 5 |

**I ख. द्वितीयः अनुच्छेदः 10 80–100 शब्दाः** **2+2+4+2**

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| I | तथ्यबोध–परीक्षणम् | एकपदेन उत्तरम् | (i) रामेश्वरक्षेत्रस्य | 1 | 2 |
| | | | (ii) केरलप्रदेशे | 1 | |
| II | '' | पूर्णवाक्येन उत्तरम् | अहो अद्य अहं पवित्रः जातःइति | 2 | 2 |
| III | | भाषिककार्यम् | (i) चिह्नम् इति पदस्य | 1 | |
| | | | (ii) रामसेतोः | 1 | |
| | | | (iii) रामः | 1 | |
| | | | (iv) पूर्वम् | 1 | 4 |
| | | | अन्यत् किमपि उपयुक्तं शीर्षकम् | | |
| IV | शीर्षकप्रदानम् | | (i) ऐतिहासिकः रामसेतुः | 2 | 2 |
| | | | (ii) विचित्रं भारतम् | 2 | 10 |

## खण्डः ख

## रचनात्मकलेखनम् **20**

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 3. | वाक्यविन्यासः | निबन्धात्मकः | मञ्जूषासहायतया रिक्तस्थानपूर्तिः | 1×10 | 10 |
| | | | (i) प्राविशत् (ii) गृहीत्वा | | |
| | | | (iii) बहिः, (iv) अवनम्य | | |
| | | | (v) रक्षाधिकारिणः, (vi) भवता | | |
| | | | (vii) प्रश्नः (viii) दुःखेन | | |
| | | | (ix) करोतु (x) महात्मनः | | |
| 4. | वाक्यविन्यासः | निबन्धात्मकः | शब्दसूचीप्रयोगेण दशवाक्यानां लेखनम् | 1×10 | 10 |
| | | | | | **20** |

## खण्डः ग

## पठित–अवबोधनम् **45**

## Text Book Comprehension

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 5 अ | **गद्यांशः** | | | | |
| 1. | तथ्यबोध – परीक्षणम् | I. एकपदेन उत्तरम् | (i) उज्जयिनीम् | ½ | 1 |
| | | | (ii) चतुरङ्गबलम् | ½ | |
| | | II. पूर्णवाक्येन उत्तरम् | (i) राज्ञः व्ययार्थम् | 1 | 2 |
| | | | (ii) यद्वस्तु स्मर्यते तद् ददाति | 1 | |
| | भाषिककार्यम् | III. लघूत्तरः | (i) दिव्याभरणानि | ½ | |
| | | | (ii) भोजनादिकम् | ½ | 2 |
| | | | (iii) रत्नचतुष्टयम् | ½ | |
| | | | (iv) एतानि | ½ | |
| 5. ब. | **पद्यांशः** | | | | 5 |
| | 'तथ्यबोध–परीक्षणम् | एकपदेन उत्तरम् | (i) गुणान् | ½ | 1 |
| | | | (ii) आपद्गतम् | ½ | |

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
| --- | --- | --- | --- | --- | --- |
| | | II. पूर्णवाक्येन उत्तरम् | पापात् निवारयति हिताय गुह्यं निगूहति, गुणान् प्रकटीकरोति आपद्गतं न जहाति, काले ददाति, कानिचित् चत्वारि | ½×4 | 2 |
| | भाषिककार्यम् | III. लघूत्तरः | (i) गुह्यम्<br>(ii) सन्तः<br>(iii) निगूहति<br>(iv) सन्मित्रलक्षणम् | ½<br>½<br>½<br>½ | 2<br>5 |
| 5. इ | **नाट्यांशः**<br>तथ्यबोध–परीक्षणम् | I. एकपदेन उत्तरम् | (i) कुमारम्<br>(ii) लवः | ½<br>½ | 1 |
| | भाषिककार्यम् | II. पूर्णवाक्येन उत्तरम् | अपूर्व–अरण्यदर्शनेन | 2 | 2 |
| | | III. लघूत्तरः | (i) आयुधश्रेणयः<br>(ii) चन्द्रकेतोः<br>(iii) दूरे<br>(iv) चन्द्रकेतवे | ½<br>½<br>½<br>½ | 2<br>5 |
| 6. | शब्दार्थज्ञानम् | मेलनम् | अ + (iv)<br>आ + (iii)<br>इ + (ii)<br>ई + (i) | ½×4 | 2<br>2 |
| 7 | प्रश्ननिर्माणम् | अतिलघूत्तरः | (i) कानि<br>(ii) कस्याः<br>(iii) कान्<br>(iv) केभ्यः | 1×4 | 4<br>4 |
| 8. | भावार्थबोधनम् | I. रिक्तस्थानपूर्तिः | (i) चेतनतत्वम्<br>(ii) ईश्वरेण<br>(iii) त्यागपूर्वकम्<br>(iv) कस्यचिदपि<br>(v) धनम्<br>(vi) भव | ½×6 | 3 |
| | | II. रिक्तस्थानपूर्तिः | (i) कर्म<br>(ii) वर्षाणि<br>(iii) कस्यचिद् | ½×6 | 3 |

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| | | | (iv) लिप्तः | | |
| | | | (v) लेपः | | |
| | | | (vi) अतिरिच्य | | 6 |
| 9. | अन्वयबोधनम् | I. रिक्तस्थानपूर्तिः | (i) महर्षेः | | |
| | | | (ii) गुरवे | ½×3 | 1½ |
| | | | (iii) कियद् | | |
| | | II. रिक्तस्थानपूर्तिः | (i) महर्षिः | | |
| | | | (ii) चिराय | ½×3 | 1½ |
| | | | (iii) अगणयत् | | 3 |
| 10 | प्रसंगसन्दर्भ–ज्ञानम् | लघूत्तरः | (i) गीता व्यासरचितात् महाभारतात् | ½×2 | 1 |
| | | | (ii) शिवराजविजयः अम्बिकादत्तव्यासः | ½×2 | 1 |
| | | | (iii) पाषाणी कन्या चन्द्रशेखरदासवर्मा | ½×2 | 1 |
| | | | (iv) प्रबन्धमञ्जरी ऋषिकेशः भट्टाचार्यः | ½×2 | 1 |
| | | | (v) किन्तोः कुटिलता, प्रबन्धपारिजातः श्रीमद्मथुरानाथशास्त्री | ½×2 | 1 5 |
| 11. | भाषिककार्यम् | | | | |
| | | I कर्तृक्रियापदचयनम् | (i) मेघमाला–प्रादुरभूत् | ½+½ | |
| | | | (ii) युवा – गच्छति स्म | ½+½ | 2 |
| | | II विशेषण–विशेष्यचयनम् | (i) सम्मुखस्थिता शत्रुता | ½+½ | |
| | | | (ii) क्रूरः किन्तुः | ½+½ | 2 |
| | | III सर्वनामपदप्रयोगम् | (i) लक्ष्म्या | 1 | |
| | | | (ii) राजानः | 1 | 2 |
| | | IV समानपदचयनम् | (i) निस्साराः | 1 | |
| | | | (ii) अपहाय | 1 | 2 |
| | | V कः कं कथयति? | (i) श्रीनायारः – कार्यालयलिपिकम् | 1 | |
| | | | (ii) सुश्रीमेरी – श्रीनायारम् (पत्रद्वारा) | 1 | 10 2 45 |

# खण्डः घ

## छन्दोऽलङ्कारपरिचयः **10+10=20**

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 12. अ | लघुगुरुवर्णविवेकः | लघूत्तरः | I (i) गुरुः | 1 | |
| | | | (ii) लघुः | 1 | |
| | | | (iii) यगणः | 1 | 4 |
| | | | (iv) पञ्चदश | 1 | |
| आ | परिभाषाज्ञानम् | लघूत्तरः | II (i) मुदीरितौ जरौ | 1 | |
| | | | (ii) उक्ता वसन्ततिलका | 1 | 3 |
| | | | (iii) यमनसभलागः | 1 | |
| इ | छन्दः अभिज्ञानम् | लघूत्तरः | III शार्दूलविक्रीडितम् | 1 | 1 |
| ई | छन्दसः उदाहरण–परीक्षणम् | लघूत्तरः | IV किमपि उदाहरणम् | 2 | 2 |
| 13. अ | परिभाषापूर्तिः | लघूत्तरः | I (i) साधर्म्यम् उपमा भेदे | 1 | |
| | | | (ii) तद्रूपकमभेदो यः | 1 | 4 |
| | | | (iii) वर्णसाम्यम् | 1 | |
| | | | (iv) अभेदो य उपमानोपमेययोः | 1 | |
| आ. | उदाहरणज्ञानम् | लघूत्तरः | II किमपि एकम् उदाहरणम् | 3 | 3 |
| इ. | अलङ्कार-परिज्ञानम् | अतिलघूत्तरः | III (i) उपमा | 1 | |
| | | | (ii) उत्प्रेक्षा | 1 | 3 |
| | | | (iii) अनुप्रासः | 1 | |
| | | | | | 20 |

# आदर्शसंस्कृतप्रश्नपत्रम् 2
# संस्कृतम् (ऐच्छिकम्)
# कोड संख्या 022
# Sanskrit (Elective)

| | |
|---|---|
| अवधिः होरात्रयम् | पूर्णाङ्काः 100 |
| समय : तीन घण्टे | पूर्णाङ्क : 100 |
| Time : 3 Hours | Maximum Marks : 100 |

निर्देशाः

सर्वे प्रश्नाः संस्कृतेनैव उत्तरणीयाः।
सभी प्रश्नों के उत्तर संस्कृत में ही लिखें।
**Answers should be written in Sanskrit only.**

उत्तराणि पृथक् दत्तायाम् उत्तरपुस्तिकायाम् एव लेखनीयानि।
सभी उत्तर अलग दी गई उत्तर पुस्तिका में ही लिखें।
**Answers should be written in the separately provided answer-sheet only.**

अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
इस प्रश्न पत्र में चार खण्ड हैं।
**There are four sections in this question paper.**

| | | |
|---|---|---|
| खण्डः क | अपठितांश–अवबोधनम् | 15 अङ्काः |
| **section A** | **(Unseen Reading comprehension)** | |
| खण्डः ख | रचनात्मकलेखनम् | 20 अङ्काः |
| **Section B** | **(Writing Skill)** | |
| खण्डः ग | पठितांश–अवबोधनम् | 45 अङ्काः |
| **Section C** | **Reading comprehension** | |
| खण्डः घ | छन्दोऽलङ्काराः | 20 अङ्काः |
| **Section D** | **(Meters and figures of speech)** | |

## खण्डः क Section A
## अपठितांश – अवबोधनम्
## (अपठितांश – अवबोधन)
## Unseen Reading Comprehension

**5+10=15**

1 **अधोलिखितम् अनुच्छेदद्वयं पठित्वा प्रश्नान् संस्कृतेन उत्तरत**
**अधोलिखित दोनों अनुच्छेदों को पढ़कर प्रश्नों के उत्तर संस्कृत में लिखें।**
**Read the following two passages and answer the questions in Sanskrit**

क **प्रथमः अनुच्छेदः**

एकदा सायङ्काले छाया मनुष्यम् अपृच्छत्, "अये! "कथं त्वम् आकारे तथैव तिष्ठसि, पश्य अहं तु प्रतिक्षणं सुदीर्घा भवामि इति।" मनुष्यः अवदत्, सत्यम् उक्तम्। भगिनि! सत्ये असत्ये वास्तविके काल्पनिके एष एव भेदः। सत्यं यथावत् तिष्ठति असत्यं यथासमयं प्रतिक्षणं परिवर्तते। यः सत्यं वदति, सः निर्भयो भूत्वा तदेव वक्ति, असत्यवादी क्षणे क्षणे स्वकथने परिवर्तनं करोति। तेन मनः उद्विग्नं भवति। अतः उच्यते–सत्ये धर्मः प्रतिष्ठितः।

**प्रश्नाः**

**I. एकपदेन उत्तरत**
**एक शब्द में उत्तर दीजिए।**
**Answer in one word only.** (1½×2=1)

(i) कः क्षणे क्षणे परिवर्तितं कथनं वदति?
(ii) धर्मः कुत्र प्रतिष्ठितः?

**II. पूर्णवाक्येन उत्तरत** (1×2=2)
**पूर्णवाक्य में उत्तर दीजिए।**
**Answer in a complete sentence**

सत्ये असत्ये कः भेदः?

**III. यथानिर्देशम् उत्तरत**
**यथानिर्देश उत्तर दीजिए।** (½×4=2)
**Do as directed.**

(i) भगिनि! इति सम्बोधनं कस्यै प्रयुक्तम्?
(ii) 'वास्तविके' इत्यस्य किं विलोमपदमत्र प्रयुक्तम्?
(iii) समयानुसारम् इति अर्थे किं पदमत्र प्रयुक्तम्?
(iv) 'अपृच्छत्' इति क्रियापदस्य कर्तृपदं किम्?

**ख. द्वितीयः अनुच्छेदः** (10)

एकः भवननिर्माता बहूनि वर्षाणि सर्वकारीयभवनानां निर्माणम् अकरोत्। सेवानिवृत्तिसमयः आगतः। तस्य स्वामी अवदत्, "एकम् अन्यं गृहनिर्माणं करोतु भवान्। एतत् एव अन्तिमं कार्यम् इति। सोऽचिन्तयत् अहं तु षण्मासानन्तरं सेवानिवृत्तः भविष्यामि। अतः स निर्माणे निकृष्टतरां सामग्रीं योजितवान्। काष्ठमपि निम्नश्रेण्याः आसीत्। बालुकायाः अधिकाधिकं प्रयोगम् अकरोत्। उपरि प्रदर्शनार्थं सुन्दरं लेपनम् कारितवान्।

तस्य मनसि विचारः उद्भूतः, "यदि भवनं वर्षान्तरे एव पतति? पुनः दुष्टभावना प्रबला अभवत्। तेन मम का हानिः? अहं तु सेवानिवृत्तः तावत् भविष्यामि इति। कार्यं समाप्य स भवननिर्माता स्वामिनम् उपगम्य भवनकुञ्जिकां समर्पितवान्। प्रहृष्टः स्वामी अवदत्," इदं गृहं तु, त्वदीयम् एव। सेवानिवृत्तिकाले इदम् एव तव मानधनम्। भवननिर्माता आकाशात् पतितः इव पश्चात्तापेन शिरः अताडयत्।

अतः अस्माभिः पूर्णकर्तव्यनिष्ठया कार्यं करणीयम्, तेन एव राष्ट्रस्य प्रगतिः भविष्यति। यथा कर्म तथा फलम्।

**प्रश्नाः**

**I. एकपदेन उत्तरत**

**एक शब्द में उत्तर दीजिए।** (½×4=2)

**Answer in one word only**

(i) भवननिर्माता भवननिर्माणे कीदृशीं सामग्रीं योजितवान्?

(ii) कार्यं समाप्य भवननिर्माता कम् उपागच्छत्?

(iii) भवननिर्माता बहूनि वर्षाणि केषां निर्माणम् अकरोत्?

(iv) उपरि प्रदर्शनार्थं भवननिर्माता कीदृशं लेपनं कारितवान्?

**II. पूर्णवाक्येन उत्तरत** (2)

**पूर्णवाक्य में उत्तर दीजिए।**

**Answer in a complete sentence**

(i) भवनस्य पूर्णतां ज्ञात्वा स्वामी भवन–निर्मातारं किम् अवदत्?

(ii) भवननिर्माता किमर्थं शिरः अताडयत्?

**III. यथानिर्देशम् उत्तरत** (4)

**यथा निर्देश उत्तर दीजिए।**

**Do as directed**

(i) 'करोतु' इति क्रियापदस्य कर्ता कः?

(ii) 'अधिकाधिकम्' इति पदं कस्य विशेषणम्?

(iii) 'प्रकटितः' इति स्थाने किं पदम् अत्र प्रयुक्तम्?

(iv) 'इदम्' इति सर्वनामपदं कस्मै प्रयुक्तम्?

**IV.** **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत** (2)
**इस अनुच्छेद के लिए समुचित शीर्षक लिखिए।**
**Write a suitable title for this paragraph.**

## खण्डः ख (Section B)

## रचनात्मकलेखनम् 20

## रचनात्मकलेखन

## Writing Skill

2. **अधोलिखितां रूपरेखां पठित्वा कथां पुनः उत्तरपुस्तिकायां दशवाक्येषु लिखत**
**निम्नलिखित रूपरेखा को पढ़कर कहानी को पुनः उत्तरपुस्तिका में दस वाक्यों में लिखिए।**
**Read the following outline and rewrite the story in answer-copy in ten sentences only.** (1×10=10)

स्वामी रामतीर्थः – अमेरिकादेशेप्रवचनं, एका अमेरिकन– महिला, आभूषणानां स्वामिनः चरणयोः स्थापनं, रुदनं, पुत्रः मृतः, जीवितं करोतु, प्रार्थना, त्वम् योगी, कर्तुं सक्षमः, आम् कर्तुं सक्षमः, बहुमूल्यं दातव्यम्, ददामि। पश्य तं निर्धनं नीग्रोबालकम्। तं नीत्वा पुत्रवत् पालय। महिला–दुष्करम् एतत्, स्वामी–तव प्रश्नः अपि तथैव। महिला तं बालकं गृहं नयति, पुत्रवत्, भारतीयसंस्कृत्याः सन्देशः, वसुधैव कुटुम्बकम्।

3. **पूर्णिमायाम् रात्रौ गगनस्य सौन्दर्यम् इति विषयम् अधिकृत्य प्रदत्तशब्दानां सहायतया दश वाक्यानि लिखत**
**पूर्णिमा की रात्रि में 'आकाश का सौन्दर्य' विषय पर दिए गए शब्दों की सहायता से दस वाक्य लिखिए।**
**Write ten sentences on the beauty of sky at full moon night with the help of given words.** (1×10=10)

**मञ्जूषा**

पूर्णः चन्द्रः, सर्वत्र अमृतवर्षणम्, असंख्यानि तारकाणि, ध्रुवतारकं तीव्रप्रकाशपूर्णम्, सप्तर्षिमण्डलम्, तारकाणि पुष्पाणि इव, चन्द्रः अमृतकलशः इव, चन्द्रस्य किरणाः शीतलाः, केचन जनाः नौकाविहारं, गगनस्य सौन्दर्यं पश्यन्ति, सर्वत्र शान्तिः, विकसन्ति, विराजन्ते, द्योतन्ते, प्राचीनकाले कौमुदीमहोत्सवस्य आयोजनम्। मेघानाम् आच्छादनात् दृश्यं, सर्वत्र कृष्णाः मेघाः

## खण्डः ग (Section C)

## पठित–अवबोधनम् **45**

## Text Book Comprehension

5. **अधोलिखितं गद्यांशं पद्यांशं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत** **15**

**निम्नलिखित गद्यांश, पद्यांश तथा नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिए।**

**Read the following extracts from prose, poetry and drama and answer the questions**

अ. **गद्यांशः** (5)

एवं सकलगुणनिवासः स विक्रमो राजा एकदा मनस्यचिन्तयत् अहो असारोऽयं संसारः, कदा कस्य किं भविष्यति इति न ज्ञायते। यत् च उपार्जितानां वित्तं तदपि दानभोगैर्विना सफलं न भवति। तथा चोक्तम्

उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।
तटाकोदरसंस्थानां परीवाह इवाम्भसाम्।।

**प्रश्नाः**

I **एकपदेन उत्तरत**

**एक शब्द में उत्तर दीजिए।** (½×2=1)

**Answer in one word only**

(i) उपार्जितानां वित्तानां कः रक्षकः?
(ii) अयं संसारः कीदृशः?

II **पूर्णवाक्येन उत्तरत**

**पूर्णवाक्य में उत्तर दीजिए।**

**Answer in a complete sentence** (1×2=2)

(i) वित्तं कैः विना सफलं न भवति?
(ii) तडागे स्थितानां जलानां रक्षकः कः?

III **यथानिर्देशम् उत्तरत** (½×4=2)

**यथानिर्देश उत्तर दीजिए।**

**Do as directed**

(i) सकलगुणनिवासः इति पदं कस्य विशेषणम्?
(ii) अचिन्तयत् इति पदस्य किं कर्तृपदम्?
(iii) 'जलानाम्' इत्यर्थे किं पदमत्र प्रयुक्तम्?
(iv) परीवाह इवाम्भसाम् इति वाक्यांशे किम् अव्ययपदम्?

**आ. पद्यांशः**

विपदि धैर्यमथाभ्युदये क्षमा,
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ,
प्रकृतिसिद्धमिदं हि महात्मनाम्।।

**प्रश्नाः**

**I एकपदेन उत्तरत** (1/2×2=1)

**एक शब्द में उत्तर दीजिए।**

**Answer in one word only**

(i) सभायां किम् अपेक्षितम्?

(ii) महात्मनाम् अभिरुचिः कस्मिन् भवति?

**II पूर्णवाक्येन उत्तरत**

**पूर्णवाक्य में उत्तर दीजिए।**

**Answer in a complete sentence** (1×2=2)

महात्मनां विपत्तौ अभिवृद्धौ च किं किं प्रकृतिसिद्धं भवति?

**III यथानिर्देशं कुरुत**

**निर्देशानुसार कीजिए।** (1/2×4=2)

**Do as directed**

(i) 'वेदे' इति स्थाने किं पदमत्र प्रयुक्तम्?

(ii) प्रथमपंक्त्यां किम् अव्ययपदम्?

(iii) 'दुरात्मनाम् इति पदस्य किं विलोमपदमत्र प्रयुक्तम्?

(iv) 'युद्धे' इति अर्थे किं पदमत्र प्रयुक्तम्?

**IV नाट्यांशः**

लवः (प्रविश्य, स्वगतम्) अविज्ञातवयः क्रमौचित्यात् पूज्यानपि सतः कथमभिवादयिष्ये (विचिन्त्य) अयं पुनरविरुद्धप्रकार इति वृद्धेभ्यः श्रूयते। (सविनयमपुसृत्य) एष वो लवस्य शिरसा प्रणामपर्यायः।

अरुन्धतीजनकौ कल्याणिन्। आयुष्मान् भूयाः।

कौसल्या जात! चिरंजीव।

अरुन्धती एहि वत्स! (लवमुत्सङ्गे गृहीत्वा आत्मगतम्) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽपि मे पूरितः।

कौसल्या जात! इतोऽपि तावदेहि। (उत्सङ्गे गृहीत्वा) अहो, न केवलं मांसलोज्ज्वलेन देहबन्धेन, कलहंसघोषघर्घरानुनादिना स्वरेण च रामभद्रम् अनुसरति।

**प्रश्नाः**

**I एकपदेन उत्तरत** (½×2=1)

**एक शब्द में उत्तर दीजिए।**

**Answer in one word only**

(i) लवः स्वरेण कम् अनुसरति?

(ii) जात! चिरं जीव इति आशीर्वादं का प्रयच्छति?

**II पूर्णवाक्येन उत्तरत** (1×2=2)

**पूर्णवाक्य में उत्तर दीजिए।**

**Answer in a complete sentence**

(i) लवम् उत्सङ्गे गृहीत्वा कस्याः मनोरथः पूरितः जातः?

(ii) लवः क्रमौचित्यम् अजानन् पूज्यान् सविनयम् उपसृत्य कथम् अभिवादयति?

**III यथानिर्देश कुरुत** (½×4=2)

**यथानिर्देश कीजिए।**

**Do as directed**

(i) 'आत्मगतम्' इत्यस्य किं समानपदम् अस्मिन् नाट्यांशे प्रयुक्तम्?

(ii) 'मांसलोज्ज्वलेन इति कस्य विशेषणम्?

(iii) जात! इति सम्बोधनं कस्मै प्रयुक्तम्?

(iv) 'अचिरात्' इति अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

**6. शब्दार्थान् मेलयत** (1/2×4=2)

**शब्दों का अर्थों से मिलान कीजिए।**

**Match the words with their meanings**

| **शब्दाः** | | **अर्थाः** |
|---|---|---|
| अ | निसर्गतः | (i) पात्राणि |
| आ | अभिजातम् | (ii) वृद्धावस्था |
| इ | भाजनानि | (iii) कुलीनम् |
| ई | जरा | (iv) स्वभावतः |

**7. स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत** (1×4=4)

**स्थूल शब्दों पर आधारित प्रश्न निर्माण कीजिए।**

**Frame questions based on the bold-lettered words.**

(i) अथ **पृथिव्याः** विभागनिरूपणम्।

(ii) सप्तग्रहाः **स्वर्ग** परितो मेखलावत् परिभ्रमन्ति।

(iii) एतेषां **सप्तद्वीपानां** प्रत्येकमावेष्टनरूपाः सप्तसमुद्राः।

(iv) **पौराणिकास्तु** सप्त द्वीपानि वदन्ति।

**8. अधोलिखितयोः पद्ययोः भावार्थयोः रिक्तस्थानपूर्तिं मञ्जूषादत्तपदैः कुरुत** (3+3=6)

**निम्नलिखित दोनों पद्यों के भावार्थों में रिक्तस्थानों की पूर्ति मञ्जूषा में दिए गए पदों से कीजिए।**

**Fill in the blanks in the following explanations of the two verses with the words given in the box.**

I असूर्या नाम ते लोकाः अन्धेन तमसावृताः।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।

II तदेजति तन्नेजति, तद् दूरे तद्वन्तिके।
तदन्तः सर्वलोकस्य, तद्धि बहिः प्रतिष्ठितः।।

**भावार्थः**

I ये नराः (i)..............हत्यां कुर्वन्ति, आत्मपतनस्य (ii)....................अनुसरन्ति, ते (iii).............. उपरान्तम् (iv)---------------परिपूर्णेषु (v)---------------युक्तेषु लोकेषु (vi)------------

II सः चलति, सः न (i)................,सः (ii)................दूरे अपि अस्ति (iii)..............अपि अस्ति, स एव (iv).........सर्वस्य (v).........विद्यमानः अस्ति, सः अस्मात् जगतः (vi)..........अपि अस्ति।

**मञ्जूषा**

| |
|---|
| मार्गम्, आसुरीभावैः, चलति, अन्तः, आत्मनः, मृत्योः, इन्द्रियेभ्यः, अस्य, बहिः अन्धकारेण, पतन्ति, समीपे, |

**9. अधोलिखितयोः अन्वययोः रिक्तस्थानानि पूरयत** (1½+½=3)

**निम्नलिखित अन्वयों में रिक्तस्थानों की पूर्ति कीजिए।**

**Fill in the blanks in the following prose-order-renderings.**

I तमध्वरे विश्वजिति क्षितीशं,
निःशेषविश्राणितकोषजातम्!,
उपात्तविद्यो गुरुदक्षिणार्थी,
कौत्सः प्रपेदे वरतन्तुशिष्यः।।

**अन्वयः** वरतन्तुशिष्यः कौत्सः (i)................ गुरुदक्षिणार्थी विश्वजिति (ii)................ निःशेषविश्राणितकोषजातं तं क्षितीशं (iii)................ ।

II सर्वत्र नो वार्तमवेहि राजन्।
नाथे कुतस्त्वय्यशुभं प्रजानाम्।
सूर्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा।।

**अन्वयः** राजन्! सर्वत्र नः वार्तम् (i)................। त्वयि नाथे प्रजानाम् (ii)................कुतः? सूर्ये तपति तमिस्रा लोकस्य (iii)................आवरणाय कथं कल्पेत।

**10 अधोलिखिताः पंक्तयः कस्य कवेः कस्मात् काव्यात् सङ्कलिताः?** (½×10=5)

**निम्नलिखित पंक्तियाँ किस कवि के किस काव्य से ली गई हैं?**

**From which work of which poet have the following lines been extracted?**

(i) न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।

(ii) एकः सायं समयप्रयुक्तः स्वभाववृत्तोऽन्धकारः स च द्विगुणितो मेघमालाभिः।

(iii) स्वकार्यं त्यक्त्वा अपरस्य सहकारस्तस्य धर्मः।

(iv) अमङ्गलमिव उपघ्नन्ति विश्वासम्।

(v) प्राचीनमर्यादाऽपि तु रक्षितव्या स्यात्।

**11 यथानिर्देशं कुरुत** (2×5=10)

**यथानिर्देश कीजिए।**

**Do as directed**

**I कर्तृपदं क्रियापदं च चिनुत** (½×4=2)

(i) क्षणे क्षणे हयस्य खुराश्चिक्कणपाषाणखण्डेषु प्रस्खलन्ति।

(ii) कलविङ्काश्चाटकैर–रुतैः परिपूर्णेषु नीडेषु प्रतिनिवर्तन्ते।

**II विशेषणविशेष्यपदं चिनुत** (½×4=2)

(i) अस्य किन्तोः कारणात् कस्मिन्नपि कार्ये सफलता न अस्ति।

(ii) अहं निश्चिन्तताया एकं निःश्वासम् अमुचम्।

**III रेखाङ्कितं सर्वनामपदं कस्मै प्रयुक्तम्?** (1×2=2)

(i) तात चन्द्रापीड! अधीतसर्वशास्त्रस्य **ते** नाल्पमपि उपदेष्टव्यम् अस्ति।

(ii) विशेषेण तु राज्ञाम्। विरला हि **तेषाम्** उपदेष्टारः।

**IV प्रदत्तशब्दयोः समानार्थकपदं चिनुत** (1×2=2)

(i) **पिप्पलः** – सर्वविधविटपिनाम् मध्यभागे स्थितः सुमहान् अश्वत्थदेवः वदति।

(ii) **बुभुक्षाशान्तिः** – श्वापदानां हिंसाकर्म किल जठरानलनिर्वाणमात्रप्रयोजकम्।

**V कः कं कथयति?** 1/2×4=2

(i) मम दायित्वहस्तान्तरणपत्रकं सज्जीकुरु।

(ii) भगवान् यीशुस्तव मङ्गलं वितनोतु।।

## खण्डः घ

## Section D

## छन्दोऽलङ्काराः

## Meters and Figures of Speech

**10+10=20**

12 **I. प्रश्नान् उत्तरत**

**प्रश्नों के उत्तर दीजिए।**

**Answer the questions** (1×4=4)

(i) विप्रः इति पदे 'वि' वर्णः गुरुः अस्ति वा लघुः?

(ii) वसन्ततिलकाछन्दसि प्रथमः वर्णः गुरुः भवति वा लघुः?

(iii) अनुष्टुप् इति पदे कः गणः?

(iv) 'शिखरिणी' छन्दसि प्रतिचरणं कति वर्णाः?

**II. अधोलिखितपरिभाषाः पूरयत** (1×3=3)

**निम्नलिखित परिभाषाएँ पूरी कीजिए।**

**Fill in the blanks in the following definitions.**

(i) ------------मालिनी भोगिलोकैः।

(ii) सूर्याश्वैर्यदि................शार्दूलविक्रीडितम्।

(iii) अनन्तरोदीरितलक्ष्मभाजौ..............................

**III. अधोलिखितचरणद्वये किं छन्दः?** (½×2=1)

**निम्नलिखित दो चरणों में कौनसा छन्द है?**

**What is the meter in the following two charanas?**

(i) वर्णाश्रमाणां गुरवे स वर्णी,

(ii) विचक्षणः प्रस्तुतमाचचक्षे।।

**IV. कस्यचिदेकस्य छन्दसः उदाहरणं लिखत।** (2)

**किसी एक छन्द का उदाहरण लिखिए।**

**Write an example of any one of the following meters.**

शिखरिणी, वंशस्थ

13. **I. अलङ्काराणाम् अधोलिखिताः परिभाषाः पूरयत** (1×4=4)

**अलङ्कारों की निम्नलिखित परिभाषाएँ पूरी कीजिए।**

**Complete the following definitions of the figures of speech.**

(i) ................प्रकृतस्य परात्मना।

(ii) ................अनेकार्थाभिधानैः.................... ।

(iii) भवेदर्थान्तरन्यासो................ ।

(iv) ................अनुप्रासः।

**II. कस्यचिदेकस्य अलङ्कारस्य उदाहरणं लिखत** (1x3=3)

**किसी एक अलङ्कार का उदाहरण लिखिए**

**Write an example of any one of the following figures of speech**

रूपकम्, यमकम्

**III. अधोलिखितपंक्तिषु के अलङ्काराः?** (1x3=3)

**निम्नलिखित पंक्तियों में कौन कौन से अलङ्कार हैं?**

**Name the figures of speech in the following lines.**

(i) रमते न मरालस्य मानसं मानसं विना।

(ii) शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।।

(iii) यशसि चाभिरुचिर्व्यसनं श्रुतौ, प्रकृतिसिद्धमिदं हि महात्मनाम्।।

# आदर्शसंस्कृतप्रश्नपत्रम् – 2
# ऐच्छिकपाठ्यक्रमः
# कक्षा द्वादशी (XII)
# खण्डः (क)
# अपठित – अवबोधनम्

15

कोड संख्या 022

अवधिः – होरात्रयम् | पूर्णाङ्कः 100

I क लघु–अनुच्छेदः 5

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| I | तथ्यबोध–परीक्षणम् | एकपदेन उत्तरम् | (i) असत्यवादी<br>(ii) सत्ये | ½<br>½ | 1 |
| II | ʻʻ | पूर्णवाक्येन उत्तरम् | सत्यं यथावत् तिष्ठति,<br>असत्यं प्रतिक्षणं परिवर्तते | 1<br>1 | 2 |
| III | भाषिककार्यम् | लघूत्तरः | (i) छायायै<br>(ii) काल्पनिके<br>(iii) यथासमयम्<br>(iv) छाया | ½<br>½<br>½<br>½ | 2<br>5 |

II ख. द्वितीयः अनुच्छेदः 80–100 शब्दाः 10

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| I | तथ्यबोध–परीक्षणम् | एकपदेन उत्तरम् | I (i) निकृष्टतराम्<br>(ii) स्वामिनम्<br>(iii) सर्वकारीयभवनानाम्<br>(iv) सुन्दरम् | ½<br>½<br>½<br>½ | 2 |
| II | ʻʻ | पूर्णवाक्येन उत्तरम् | II (i) इदं भवनं तु त्वदीयमेव<br>(ii) पश्चात्तापेन | 1<br>1 | 2 |
| III | भाषिककार्यम् | अतिलघूत्तरः | III (i) भवान्<br>(ii) प्रयोगम् इत्यस्य/प्रयोगस्य<br>(iii) उद्भूतः इति पदस्य<br>(iv) भवनस्य/भवनम् इत्यस्य | 1<br>1<br>1<br>1 | 4 |
| IV | समुचितशीर्षकम् | लघूत्तरः | IV (i) कर्तव्यनिष्ठा<br>(ii) यथा कर्म तथा फलम् | 2 | 2<br>10 15 |

## खण्डः ख

## रचनात्मकलेखकनम् 20

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|
| 3. | रूपरेखां पठित्वा कथालेखनम्<br>रूपरेखानुसारं दशवाक्यानि लेखनीयानि<br>प्रतिवाक्यम् एकः अङ्कः | निबन्धात्मकः | 1×10 | 10 |
| 4. | मञ्जूषाप्रदत्तशब्दैः दशवाक्यानां निर्माणम्<br>प्रतिवाक्यम् एकः अङ्कः<br>विषयः रात्रौ गगनस्य वर्णनम् | निबन्धात्मकः | 1×10 | 10 |
| | | | | **20** |

## खण्डः ग

## पठित–अवबोधनम् 45

## Text Book Comprehension

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 5. अ | गद्यांशः तथ्यबोध–परीक्षणम् | I एकपदेन उत्तरम् | (i) त्यागः<br>(ii) असारः | ½<br>½ | 1 |
| | | II पूर्णवाक्येन उत्तरम् | (i) दानभोगैः<br>(ii) परीवाहः | 1<br>1 | 2 |
| | भाषिककार्यम् | III लघूत्तरः | (i) विक्रमस्य<br>(ii) विक्रमः<br>(iii) अम्भसाम्<br>(iv) इव | ½<br>½<br>½<br>½ | 2<br>5 |
| आ | पद्यांशः तथ्यबोध–परीक्षणम् | I एकपदेन उत्तरम् | (i) वाक् पटुता<br>(ii) यशसि | ½<br>½ | 1 |
| | | II पूर्णवाक्येन उत्तरम् | (i) धैर्यम्, क्षमा | 1+1 | 2 |
| | भाषिककार्यम् | III लघूत्तरः | (i) श्रुतौ<br>(ii) अथ<br>(iii) महात्मनाम्<br>(iv) युधि | ½<br>½<br>½<br>½ | 2<br>5 |

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| **इ.** | **नाट्यांशः** | | | | |
| I | तथ्यबोध–परीक्षणम् | एकपदेन | (i) रामभद्रम् | ½ | 1 |
| | | | (ii) कौसल्या | ½ | |
| II | | पूर्णवाक्येन | (i) अरुन्धत्याः | 1 | |
| | | | (ii) एष वो लवस्य शिरसा प्रणामपर्यायः | 1 | 2 |
| III | भाषिककार्यम् | अतिलघूत्तरः | (i) स्वगतम् | ½ | |
| | | | (ii) देहबन्धेन इत्यस्य | ½ | |
| | | | (iii) लवाय | ½ | 2 |
| | | | (iv) चिरात् | ½ | 5 |
| 6. | शब्दार्थमेलनम् | अतिलघूत्तरः | अ + (iv) | ½ | |
| | | | आ + (iii) | ½ | |
| | | | इ + (i) | ½ | |
| | | | ई + (ii) | ½ | 2 |
| | | | | | 2 |
| 7. | प्रश्ननिर्माणम् | अतिलघूत्तरः | (i) कस्याः, | 1 | |
| | | | (ii) कम् | 1 | |
| | | | (iii) केषाम् | 1 | 4 |
| | | | (iv) के | 1 | 4 |
| 8. | भावार्थपूर्तिः | I लघूत्तरः | (i) आत्मनः | ½ | |
| | | | (ii) मार्गम् | ½ | |
| | | | (iii) मृत्योः | ½ | |
| | | | (iv) अन्धकारेण | ½ | 3 |
| | | | (v) आसुरभावैः | ½ | |
| | | | (vi) पतन्ति | ½ | |
| | | II लघूत्तरः | (i) चलति | ½ | |
| | | | (ii) इन्द्रियेभ्यः | ½ | |
| | | | (iii) समीपे | ½ | |
| | | | (iv) आत्मनः | ½ | |
| | | | (v) अन्तः | ½ | |
| | | | (vi) बहिः | ½ | 3 6 |

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 9. | अन्वयपूर्तिः | लघूत्तरः I | (i) उपात्तविद्यः | ½ | |
| | | | (ii) अध्वरे | ½ | |
| | | | (iii) प्रपेदे | ½ | 1½ |
| | | II | (i) अवेहि | ½ | |
| | | | (ii) अशुभम् | ½ | 1½ |
| | | | (iii) दृष्टेः | ½ | 3 |
| 10. | कविकाव्य–परिचयः | | (i) गीता–व्यासः | 1 | |
| | | | (ii) शिवराजविजयः अम्बिकादत्तव्यासः | 1 | |
| | | | (iii) पाषाणीकन्या, चन्द्रशेखरदासवर्मा | 1 | |
| | | | (iv) प्रबन्धमञ्जरी ऋषिकेश भट्टाचार्यः | 1 | |
| | | | (v) 'किन्तोः कुटिलता' प्रबन्धपारिजातः श्रीमद्मथुरानाथशास्त्री | 1 | 5 |
| 11. | भाषिककार्य–परीक्षणम् | अतिलघूत्तरः | | | |
| | I कर्तृक्रिया–पदचयनम् | | (i) खुराः –प्रस्खलन्ति | 1 | |
| | | | (ii) कलविङ्काः प्रतिनिवर्तन्ते | 1 | 2 |
| | II विशेषण–विशेष्यचयनम् | | (i) कस्मिन् कार्ये | 1 | |
| | | | (ii) एकं निःश्वासम् | 1 | 2 |
| | III सर्वनामपद–प्रयोगः | | (i) चन्द्रापीडाय | 1 | |
| | | | (ii) राज्ञाम् इति कृते | 1 | 2 |
| | IV समानार्थक–पदचयनम् | | (i) अश्वत्थः | 1 | |
| | | | (ii) जठरानलनिर्वाणम् | 1 | 2 |
| | V कः कं कथयति? | | (i) श्रीनायारः कार्यालयलिपिकम् | 1 | |
| | | | (ii) सुश्रीमेरी–श्रीमायारम् (पत्रद्वारा) | 1 | 2<br>10 45 |

# खण्डः घ
## छन्दोऽलङ्कारपरिचयः

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 12. अ | स्वरविवेकः | लघुगुरुविभेदः | (i) गुरुः | 1 | |
| | | | (ii) गुरुः | 1 | |
| | | | (iii) यगणः | 1 | |
| | | | (iv) सप्तदशवर्णाः | 1 | 4 |
| आ | परिभाषापूर्तिः | लघूत्तरः | (i) ननमयययुतेयम् | 1 | |
| | | | (ii) मःसजौ सततगाः | 1 | |
| | | | (iii) पादौ यदीयावुपजातयस्ताः | 1 | 3 |
| इ | छन्दसः अभिज्ञानम् | | उपजातिः | 1 | 1 |
| ई | उदाहरणज्ञानम् | | कस्यचिदेकस्य अलङ्कारस्य उदाहरणम् | 2 | 2 |
| | | | | | 10 |
| 13. अ. | परिभाषापूर्तिः | लघूत्तरः | (i) भवेत् सम्भावनोत्प्रेक्षा। | 1 | |
| | | | (ii) श्लिषैः पदैः/श्लेष इष्यते | 1 | |
| | | | (iii) अनुषक्तार्थान्तराभिधः | 1 | |
| | | | (iv) वर्णसाम्यम्। | 1 | 4 |
| आ | उदाहरणज्ञानम् | निबन्धात्मकम् | कस्यचिदेकस्य अलङ्कारस्य उदाहरणम् | | 3 |
| 5. | अलङ्कार–अभिज्ञानम् | लघूत्तरः | (i) यमकः | 1 | |
| | | | (ii) उपमा | 1 | |
| | | | (iii) अर्थान्तरन्यासः | 1 | 3 |
| | | | | | 10 |
| | | | | 10+10=20 | |

# संस्कृत–आदर्शप्रश्नपत्रम्
# ऐच्छिकम् (Elective)
# कक्षा – द्वादशी XII
# प्रश्नपत्रस्य रूपरेखा

कोड सं. : 022 पूर्णाङ्काः 100

| खण्ड–नाम | प्रश्न संख्या | प्रश्न–उद्देश्यम् | प्रश्न प्रकारः | अंङ्कसङ्केतः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| खण्डः क अपठितांश–अवबोधनम् [15] | 1 | तथ्यबोध–परीक्षणम् | I. अतिलघूत्तरः | 1 | 5 |
| | | | II. लघूत्तरः | 2 | |
| | | | III. अतिलघूत्तरः | 2 | |
| | 2 | तथ्यबोध–परीक्षणम् | I. अतिलघूत्तरः | 2 | 10 [15] |
| | | | II. लघूत्तरः | 4 | |
| | | | III. अतिलघूत्तरः | 2 | |
| | | | IV. लघूत्तरः | 2 | |
| खण्डः 'ख' रचनात्मक–लेखनम् [20] | 3. | रूपरेखामधिकृत्य वाक्यविन्यास–परीक्षणम् | निबंधात्मकः (कथालेखनम्) | 1 × 10 | 10 |
| | 4. | मञ्जूषासहायतया वाक्यःसंरचना–बोधः | निबंधात्मकः (अनुच्छेदलेखनम्) | 1 × 10 | 10 [20] |
| खण्डः 'ग' पठित–अवबोधनम् [45] | 5 अ | गद्यांशतथ्यबोध–परीक्षणम् | अतिलघूत्तरः लघूत्तरः च | I. ½ × 2=1<br>II. 1 + 1=2<br>III. ½ × 2=2 | 5 |
| | आ | पद्यांशतथ्यबोध–परीक्षणम् | अतिलघूत्तरः लघूत्तरः च | | 5 |

| खण्ड नाम | प्रश्न संख्या | प्रश्न–उद्देश्यम् | प्रश्न प्रकारः | अंङ्कसङ्केतः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| | इ | नाट्यांशतथ्य–बोध–परीक्षणम् | अतिलघूत्तरः लघूत्तरः च | 1+2+2=5 | 15 |
| | 6. | शब्दार्थमेलनम् | अतिलघूत्तरः | ½ x 4=2 | 2 |
| | 7. | प्रश्ननिर्माण–कौशल–परीक्षणम् | अतिलघूत्तरः | 1 x 4 = 4 | 4 |
| | 8. | भावार्थपूर्तिबोध–परीक्षणम् | लघूत्तरः | 3+3=6 | 6 |
| | 9. | अन्वयपूर्तिबोधः | लघूत्तरः | 3+3=6 | 3 |
| | 10. | कवि–काव्य–परिचय–बोध परीक्षणम् | लघूत्तरः | 1 x 5=5 | 5 |
| | 11. | भाषिककार्य–परीक्षणम् | अतिलघूत्तरः | 2+2+2+2+2 | 10 |
| | | | | | 45 |
| खण्डः 'घ' छन्दोऽलङ्कार–परिचयः<br>20 | 12. | स्वरविवेकः, परिभाषा पूर्तिः, छन्दसः अभिज्ञानम् उदाहरणज्ञानं च बोधपरीक्षणम् | अतिलघूत्तरः<br>लघूत्तरः<br>लघूत्तरः | 1+1+1+1=4<br>1+1+1=3<br>1 = 1<br>2 = 2 | 10 |
| | 13. | अलंकार–अभिज्ञान–बोधपरीक्षणम् | लघूत्तरः<br>निबन्धात्मकः<br>लघूत्तरः | 1+1+1+1=4<br>3<br>1+1+1=3 | 10<br>20 |